


# प्रबोधोत्सव तुलसी विवाहौ

१) यदुक्तं विष्णुयामले- आदावेवाथ तुलसीं वने वा स्वगृहेऽपिवा।
मासत्रयेण संवर्ध्य ततो यजनमारभेत्॥ सौम्यायने प्रकर्तव्यं
गुरुशुक्रोदये तथा। अथवा कार्तिके मासि भीष्मपंचदिनेषु वा।
वैवाहिकेषु ऋक्षेषु पूर्णिमायां विशेषतः। कृत्वा च रौप्य-
तुलसीं सौवर्णं स्थापयेत् हरिम्॥ सम्पूज्यालंकृतां तां च
प्रदद्याद्विधिना हरेः॥ विवाहकर्मवत् सर्वं कर्तव्यं दैशिकोत्तमैः॥

२) प्रकारान्तरेण- नवम्यादिदिनत्रये एकादश्यादि दिनपंचके
कार्तिके शुक्लान्तर्गत विवाहनक्षत्रे वा इत्याद्यन्यतमकाले
अर्धास्तमिते गोधूलिके कार्यः। प्रायः द्वादश्यां —

Scanned by CamScanner

सायंसंध्याकाल व्यापिन्यां प्रबोधोत्सव तुलसी विवाहयोः संक्षेपतः तन्त्रेणानुष्ठानमिति सर्वत्राचारः। अतस्तदनुसारेणैन प्रयोगोभि धीयते। द्वादश्यां सायंसंध्यावन्दनादिकं विधाय, भूमिं गोमयेनोलिप्य, रंगवल्लीभिरलंकृतं पीठं इक्षुमंडपिकायुतं कृत्वा ॥

३) प्रकारान्तरेण — चातुर्मास्य व्रतपक्षे आषाढ्यां तुलसी-रोपणं तत्प्रभृति कालत्रये पूजनं ॥ तुलसि श्री सखि शुभे — पापहारिणि पुण्यदे ॥ नमस्ते नारदनुते नारायणि नमोस्तुते ॥ इति सम्प्रार्थ्य ॥ श्री तुलस्यै नमः इति मन्त्रेण पयो घटैः सेचनं। एवं प्रत्यहं प्रबोध द्वादशी पर्यन्तं कार्यम् ॥ द्वादश्यां विवाहः ॥ गुरुशुक्रास्तादि दोषो नास्तीति निर्णयसिन्धौ ॥ मण्डप वेदिकां

हरिद्रादि विवाह सामग्रींच सम्पाद्य कृतनित्यक्रियो यजमानः प्रबोध द्वादश्यामुक्ता पराह्णे मांगलिक स्नानं विधाय पीठे-उपविष्टः इष्टदेवतां गुरूंश्च नमस्कृत्य ॥

## मुख्य प्रयोग

आचम्य ॥ प्राणानायम्य ॥ देशकालौ निर्दिश्य ॥ एवंगुण-विशेषण——— फलप्राप्त्यर्थं मम दशपूर्वान् दश परान् आत्मना सह एकविंशति पुरुषान् उध्दर्तुं ब्रह्मलोक सायुज्यार्थं-श्री परमात्मनासह तुलसी विवाहं करिष्ये ॥ इति संकल्प्य ॥ तदंगं महागणपति पूजनं स्वस्ति पुण्याहवाचनम् मातृकापूजनं-नान्दीश्राध्दं (ग्रहयज्ञं) मण्डप प्रतिष्ठां कुलदेवता स्थापनंच-करिष्ये ॥

पुण्याहे अद्य परमात्मनासह तुलस्या विवाहाख्यस्य कर्मणः

Scanned by CamScanner

पुण्याहं भवन्तोब्रुवन्तु ॥ ॐ पुण्याहं ३॥

अद्य परमात्मना सह श्रीतुलस्या: विवाहाख्याय कर्मणे स्वस्ति भवन्तोब्रुवन्तु एवं ऋध्दिः श्रीरस्त्विति प्रयोगोज्ञेयः ॥ तानि कृत्वा ॥ आचार्यादि चतुर्णां वरणं तेषां मधुपर्कादि-पूजनम् ॥ आचार्यः यदत्रेति सर्षप विकिरणादि देवयजनं रक्षस्वेत्यंतं कृत्वा, [तुलस्या अग्रे मण्डपादीशान्यां सर्वतोभद्रं-विरच्य तत्र ब्रह्मादि देवता आवाह्य पूजयेत् ॥ तत्र महीद्यौ-रित्यादि पूर्णपात्र निधानान्ते सुवर्ण प्रतिमायां अग्न्युत्तारणादि-परमात्मनः तुलस्याश्च प्राण प्रतिष्ठा षोडशोपचारैः पूजां च कुर्यात् ॥] २

तुलस्याः हरेश्च मांगलिक स्नानं ( अभ्यंग स्नानं ) विधाय । वाग्दानं कुर्यात् ॥

## ॥ वाग्दानम् ॥

अनृक्षरा ऋजवः सन्तु ----- सुयममस्तु देवाः ॥ इति तुलस्यै फलादि दत्त्वा ॥ ॐ गणानान्त्वा. देवीं वाचमज-नयन्त --- सुष्टुतैतु ! वरगोत्रमुच्चार्य वैयाघ्रपद गार्ग्य-वासिष्ठेति त्रिप्रवरान्विते व्याघ्रपद गोत्रोत्पन्नाय देवमीढ वर्मणः प्रपौत्राय शूरसेनवर्मणः पौत्राय वसुदेव वर्मणः पुत्राय अनेककोटि ब्रह्माण्डनायकाय दामोदराय श्रीधराय वराय आलम्बायन देवल गौतमेति त्रिप्रवरान्वित विश्वकर्मणः प्रपौत्रीम् प्रजापतेः पौत्रीम् ईश्वरस्य पुत्रीम् तुलसीं कन्याम् भार्यात्वाय वृणीमहे ॥ ततो दाता वृणीध्वम् इति-वदेत् ॥ एवं पुनर्द्विः ॥ ततो दाता प्रदास्यामि-प्रदास्यामि ॥ प्रदास्यामि ॥ इति उच्चैस्त्रिर्वदेत् ॥

Scanned by CamScanner

ततो दाता आचम्य ॥ प्राणानायम्य ॥ देशकालौ
निर्दिश्य ॥ अद्येत्यादि --- फलप्राप्त्यर्थं ---- गोत्रो-
शर्माहं करिष्यमाण, परमात्मा कृष्ण दामोदर विवाहांगभूतं कन्या निरीक्षणं-
फलैः कन्यापूजनंच करिष्ये ॥ तदंग आदौ निर्विघ्नता सिद्ध्यर्थं
महागणपति पूजनम् वरुणपूजनं च करिष्ये ॥
गणपतिं वरुणंच सम्पूज्य ॥ देवदानव संवादे मथ्यमाने 3
महोदधौ ॥ उत्पन्नोसि ---- कर्तुं मोहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा ॥ अनेन
कृतपूजनेन वरुणः प्रीयताम् ॥ ततो तुलसीं सम्पूज्य ॥

## ॥ अथ तुलसी विवाहे तुलसी पूजन विधिः ॥

श्रीगणेशायनमः ॥ तत्रादौ तुलसी पश्चिमतः प्राङ्मुख उपविश्य
आचम्य ॥ प्राणानायम्य ॥ देशकालौ स्मृत्वा ॥ ममसमस्त पातकु
शमन पूर्वकं अभीष्ट सिद्धिद्वारा श्री परमेश्वर प्रीत्यर्थं
तुलसी विवाहांग भूतं यथामिलितोपचार द्रव्यैः श्री तुलसी-
पूजनंच करिष्ये ॥ इति संकल्पयेत् ॥ ध्यानम् - ध्यायामि -
तुलसीं देवीं श्यामां कमललोचनाम् ॥ प्रसन्नां पद्मकल्हार
वराभयचतुर्भुजाम् ॥ किरीटहार केयूर कुण्डलादि विभूषिताम् ॥
धवलांशुक संयुक्तां पद्मासन निषेदुषीम् ॥ इति ध्यानम् ॥
हिरण्यवर्णां हरिणीम् --- भगवत्यै तुलस्यै नमः आवाहनार्थे १ ॥
त्रैलोक्य जननीं देवीं सर्वलोकैक पावनीम् ॥ सम्पूजयामि-

Scanned by CamScanner

देवेशि तुलसि त्वाम् हरिप्रिये ॥

ॐ तांमआवह.. विष्णुवल्लभायै॰ आसनार्थे॰ ॥२॥

ॐ अश्वपूर्वाम्.. सर्वदेवमयायै॰ पादयोः पाद्यम् ॥३॥

ॐ कांसोस्मितां.. सर्वतीर्थमयायै॰ हस्तयोः अर्घ्यम् ॰४॥

ॐ चन्द्रां प्रभासां.. दैत्यान्तकृत्प्रियायै॰ अर्घ्यानन्तरेणआच॰ ५

ॐ आदित्यवर्णे.. सर्वलोकहितायै॰ स्नानीयं समर्प॰ ६॥

सुवासिनीभिः मंगलवाद्यघोषपुरःसरं नागवल्ली दलगृहीताभ्यां सुगन्धि-तैलहरिद्राभ्यां उष्णोदकेन च मंगलस्नानं कारयित्वा स्वयं वा दत्त्वा॥

ॐ उपैतुमां देवसखः.. लक्ष्मी सहोदरायै॰ वस्त्रयुग्म कंचुकों॰ ७॥

ॐ क्षुत्पिपासामलां.. महादेव्यै॰ गन्धं समर्पयामि ॥ ८॥ ४

गन्धोपरि हरिद्राकुंकुमं॰॥ परिमलद्रव्याणि समर्प॰ ॥

ॐ गन्धद्वारान्दुरा... रमावासायै॰ पुष्पाणि॰ ॥ ९॥

॥ पुष्पैः पूजयामि ॥

ॐ मनसःकाम--- अभीष्टदायै॰ धूपम्॰ १०॥

ॐ कर्दमेनप्रजा-- पापहारिण्यै॰ दीपम् ११॥

ॐ आपःस्रजन्तु-- भगवत्यै॰ नैवद्यम् आचमनीयंच १२॥

ॐ आर्द्रांपुष्करिणीं--.अमृतसंभूतायै॰ मुखवासा॰ तंबूलं-
-ऋतुफलानिच १३॥

ॐ आर्द्रांयःकरिणीं-- अमृतरूपिण्यै॰ दक्षिणाम्॰१४॥

ॐ तांमआवह.. जगद्धात्र्यै॰ कर्पूरेण नीराजनम् १५॥

ॐ महादेव्यै च विद्महे-- सुदक्षिणायै॰ प्रदक्षिणाम् १६॥

Scanned by CamScanner

श्रीवर्चस्वमायुष्य... परमेश्वर्यै॰ पुष्पांजलिम् १७॥
श्रीर्मे भजतु अलक्ष्मीर्मे.. अभीष्टदायै॰ नमस्कारान् १८॥
एवं षोडशोपचारैः सम्पूज्य प्रार्थयेत् — सौभाग्यं सन्ततिं-
देहि धनं धान्यं च मे सदा॥ आरोग्यं शोकशमनं कुरु मे-
माधवप्रिये॥१॥ अभीष्ट फलसिध्दिं च सदा देहि हरिप्रिये॥
देवैस्त्वं निर्मिता पूर्व मर्चितासि मुनीश्वरैः॥२॥ अतो मां
सर्वदा भक्त्या कृपादृष्ट्या विलोकय। पतेरायुश्च भाग्यं च सदा-
देहि हरिप्रिये॥३॥ पूतनाभयसंत्रासाद्रक्षितश्च यथा हरिः।
तथा संसार संत्रासाद्रक्ष मे वंशमुत्तमम्॥४॥ तुलसि श्री- ५
सखि शुभे पापहारिणि पुण्यदे। नमस्ते नारदनुते
नारायण मनः प्रिये॥५॥ तुलसी मंगलम्॥

ततो दाता देशकालौ स्मृत्वा तुलसी विवाहांग भूतं वाग्दान-
महं करिष्ये॥ गणपतिं वरुणं च सम्पूज्य॥
स्वस्थाने तुलसी पूजयितार मुपवेश्य स्वयं तत्प्राच्यां -
प्रत्यङ्मुख उपवेश्य तं गन्ध ताम्बूलादिना सम्पूज्य॥ सन्ध
दातारम्॥ ततो दाता हरिद्रा खण्ड पंचदृढ पूगीफलानि-
हस्ते गृहीत्वा॥ वरगोत्रमुच्चार्य वैयाघ्रपद गार्ग्य -
वासिष्ठेति त्रिप्रवरान्वित व्याघ्रपद गोत्रोत्पन्नाय
देवमीढ वर्मणः प्रपौत्राय शूरसेन वर्मणः पौत्राय
वसुदेव वर्मणः पुत्राय अनेक कोटि ब्रह्माण्डनायकाय
सकल प्रवर गोत्र जनकाय पार्वती बीजसम्भूताय वृन्दा-
भस्मनि संस्थिताय अनादि मध्य निधनाय परमात्मने

Scanned by CamScanner

श्रीकृष्ण दामोदर वराय ॥ आलम्बायन देवल गौतमेति त्रिप्रवरान्वित विश्वकर्मणः प्रपौत्रीम् प्रजापतेः पौत्रीम् ईश्वरस्य पुत्रीम् - अमुक गोत्रोत्पन्नां (यजमानस्य) अमुक शर्मणः पालित प्रपौत्रीम् अमुक शर्मणः पालित-पौत्रीम्, अमुक पालित पुत्रीम् पयोघटैः सेचित-कन्यावत् वर्द्धित भावनीय तुलसी नाम्नीं कन्याम् ज्योतिर्विदादिष्टे सुमुहूर्ते दास्ये ॥ इति वाचा सम्प्रददे ॥ ६

(क्वचित आचार्य वस्त्रप्रान्ते तानि बद्ध्वा ॥ गन्धादिना सम्पूज्य ॥

विश्वमोहिने पालित पावने पुरुषोत्तमे सकल गुण संयुते ॥

इमां देवीं प्रदास्यामि भक्तानां तारणायच ॥ तथैव वर-पित्रादिः (आचार्यः) गृहीत्वा व्याघ्रपद गोत्रे कृष्णदामोदर-परमात्मनि वरविषये निश्चिता भवन्तु ॥ इतिदातुर्वस्त्र प्रान्ते बध्नीयात् ॥ गन्धाद्यैः सम्पूज्य ॥ तदस्तु मित्रा॰ गृहावे-प्रतिष्ठा सूक्तं... ॥ ग्रंथिं चन्दनेन चर्चयेत् ॥

कन्या पिता

वाचा दत्ता मया देवि कृष्णार्थे स्वीकृता त्वया ।
देव्यावलोकन विधौ निश्चितस्त्वं सुखी भव ॥

वर पिता (आचार्यः)

वाचा दत्ता त्वया देवी कृष्णार्थे स्वीकृता मया ।
कृष्णावलोकन विधौ निश्चितस्त्वं सुखी भव ॥

Scanned by CamScanner

ततो ब्राह्मणाः शिवा॰ सौमनस्य॰ अक्षतं॰ दीर्घमायुः

श्रेयः शान्तिः॰ एतद्वः सत्यमस्तु ॥ ॐ समानीव आकूतिः॰

ॐ प्रसुग्मंता॰ ॥ इन्द्राणीं सम्पूज्य॰ ॥ देवेन्द्राणि नमस्तुभ्यं॰

सुवासिनीभिः उभयोर्नीराजनं कार्यम् ॥ ब्राह्मणान् सम्पूज्य ॥

ॐ हिंकृण्वती॰ १॥ ॐ वनस्पते शतवल्शो॰ २॥ ॐ

समिद्धस्य॰ ३। ॐ इन्दुर्देवाना॰ ४। ॐ अस्यपिब क्षुमत॰ ५।

ॐ घृतादुर्लुप्तं॰ ६॥ गृहावै प्रतिष्ठा सूक्तं... प्रतिष्ठा प्रतिष्ठा ॥

—×—×—

## — श्रीकृष्ण दामोदर पूजनम् —

६

## — प्रबोधोत्सवांग श्रीकृष्ण पूजनम् —

आचम्य ॥ प्राणानायम्य ॥ देशकालौ निर्दिश्य ॥ मम समस्त पापक्षय पूर्वक श्री महाविष्णु प्रसाद सिद्धिद्वारा श्री परमेश्वर प्रीत्यर्थं कृत विष्णु शयनोत्सवांग भूतं अद्य कार्तिक शुक्ल एकादश्याम् (द्वादश्यां वा) विष्णु प्रबोधोत्सवं करिष्ये। तदंगत्वेन महाविष्णु पूजनं च करिष्ये ॥ देवं षोडशोपचारैः पुरुष-सूक्तैः सुगन्धि तैल हरिद्राभ्यंगपूर्वकं षोडशोपचारैः सम्पूज्य ॥ यथा सम्भव वीणा मंगल वाद्य गीत शंख घण्टा वादनाभिः देवं प्रबोधयेत् ॥ तत्र मन्त्राः —

ॐ विष्णोर्नुकं वीर्याणि - - - - - - त्रेधोरुगायः ॥

ॐ यो जागार तमृचः कामयन्ते यो जागार तमु सामानि-
यान्ति। यो जागार तमयं सोम ऽ आहुतवाह मास्मि-
सख्ये न्योकाः॥ ॐ अग्निर्जागार तमृचः कामयन्ते ऽ-
ग्निर्जागार तमु सामानि यान्ति॥ अग्निर्जागार तमयं सोम ऽ-
आहुतवाह मास्मि सख्ये न्योकाः॥ ॐ जागर्षि त्वं भुवने-
जातवेदो जागर्षि यत्र यजते हविष्मान्। इदं हविः श्रद्द-
धानो जुहोमि तेन पासि गुह्यं नामगोनाम्॥
ॐ इदं विष्णुर्विचक्रमे------ अस्य पांसुरे॥ ८
ब्रह्मेन्द्ररुद्राग्नि कुबेरसूर्य सोमादिभिर्वन्दित वन्दनीय।
बुध्यस्व देवेश जगन्निवास मन्त्रप्रभावेण सुखेन देव॥

---

इयं तु द्वादशी देव प्रबोधार्थं विनिर्मिता।
त्वयैव सर्वलोकानां हितार्थं शेषशायिना॥
उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रां जगत्पते।
त्वया चोत्थीयमानेन उत्थितं भुवनत्रयम्॥
उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव॥
उत्तिष्ठोत्तिष्ठ गोविन्द उत्तिष्ठ गरुडध्वज।
उत्तिष्ठ कमलाकान्त त्रैलोक्यं मंगलं कुरु॥ एवं
उत्थाप्य॥ चरणं पवित्रं विततं...॥ गतामेघा वियच्चैव
निर्मलं निर्मला दिशः। शारदानि च पुष्पाणि गृहाण
[मेघा गता निर्मलपूर्णचन्द्रः शारद्यपुष्पाणि मनोहराणि।
अहं ददानीति च पुण्यहेतोर्जागृष्व जागृष्व च लोकनाथ]

Scanned by CamScanner

तुलसी कुन्द मन्दार पारिजाताम्बुजैस्तुया। पंचभिर्ग्रथिता माला
वनमालेति कथ्यते॥ — वनमालाम्॥
मम केशव॥ पुष्पांजलिं दद्यात्॥ आवाहनं न जानामि..॥

अनेन विष्णु प्रबोधोत्सवाख्येन कर्मणा तेन श्री भगवान्-
महाविष्णुः प्रीयताम्॥

ततः पंचघोषपूर्वकं शिबिकादिना आगतं श्री भवन्तं
वरमानेतुं कतिचित् पदानि गत्वा द्वारमानाय्य यथाशक्ति
पुष्पांजलिं समर्पणपूर्वकं यानादवतार्य स्वस्तिकादि-
शोभितायां शुध्दायां भूमौ स्वासने प्राङ्मुखमुपवेश्य
स्वयम् उदङ्मुख उपविशेत्। ९

## मधुपर्कः

आचम्य॥ प्राणानायम्य॥ अद्येत्यादि -- फलप्राप्त्यर्थं
अमुक गोत्रोऽमुक शर्माऽहम् करिष्यमाण

तुलसीदान प्रतिग्रहार्थं द्वारदेशागतं दामोदरं वरं
मधुपर्केण अर्चयिष्ये॥ इति संकल्प्य॥ तत्रादौ
महागणपति स्मरणंच करिष्ये॥ ततोऽस्तमिते आचार्यः
स्वशाखोक्तं मधुपर्कं कुर्यात्॥ ततः तुलसी संमुखां श्रीकृष्ण-
प्रतिमां कृत्वा मध्ये अन्तःपटं धृत्वा मंगलाष्टक पद्यानि पठेयुः॥
— तुलसी मूले दामोदर चिन्तनः सावधान —
तदेव लग्नं सुदिनं तदेऽऽव ----लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥
— तुलसी मूले दामोदर चिन्तनस्सावधाऽऽन —
ततः अन्तःपट मुदगपसार्य अक्षतप्रक्षेपं कृत्वा॥ उभयोः
पुष्पमालां समर्प्य, सुवासिनीभिः उभयोर्नीराजनं
कारयित्वा॥

## ॥ कन्यादानविधिः ॥

आचम्य ॥ प्राणानायम्य ॥ देशकालौ निर्दिश्य ॥ — मम जन्म-
प्रभृति उपार्जित कायिक् वाचिक् मानसिक् त्रिविध पापक्षय-
पूर्वक् समस्त पितॄणां निरतिशय सानन्द ब्रह्मलोकावाप्त्यादि-
कन्यादान कल्पोक्त फल पुत्रपौत्रादि अनवाच्छिन्न सन्तति लक्ष्मी प्राप्त्यादि-
पुराकल्पोक्त फलसिध्दि दशपूर्वान् दशपरान् आत्मनासह-
एकविंशति पुरुषोध्दरण वैकुण्ठ भवन गमन तत्रत्य विपुल- 10
भोग उपभुक्त्यनन्तरं विष्णु सायुज्य प्राप्त्यर्थं तुलसीदान
कल्पोक्त फलावाप्तये अनेन जनार्दनेन अस्यां तुलस्यां
बीजोत्पादनेन ज्ञान अवाप्ति व्दारा श्री प्रीतये —

तुलसीदानमहं करिष्ये ॥ सपत्नीक् उत्थाय ॥ प्रार्थयेत् ॥
अनादि मध्य निधन त्रैलोक्य प्रतिपादक् । इमां गृहाण तुलसीं-
विवाह विधिनेश्वर ॥ पार्वती बीज सम्भूतां वृन्दा भस्मनि-
संस्थिताम् । अनादि मध्य निधनां धवलां ते ददाम्यहम् ॥
पयो घटैश्च सेवाभिः कन्यावद्वर्धिता मया । त्वत्प्रियां
तुलसीं तुभ्यं दास्यामि त्वम् गृहाण भोः । देवीं कनक-
सम्पन्नां कनकाभरणैर्युताम् । दास्यामि विष्णवे तुभ्यं
ब्रह्मलोक् जिगीषया । विश्वंभरः सर्वभूतः साक्षिण्यः सर्व-
देवताः । इमां देवीं प्रदास्यामि पितॄणां तारणायच ॥ ततः
कांस्यपात्रे जनार्दन हस्तेन तुलसी पल्लवं धृत्वा अक्षतोदकं

Scanned by CamScanner

क्षिपन् वदेत् ॥ तुलसी तारयतु । पुण्यं वर्धतां । शिवा आपः -
सन्तु । सौमनस्यमस्तु । अक्षतं चारिष्टं चास्तु । दीर्घमायुः श्रेयः
शान्तिः पुष्टिस्तुष्टिश्चास्तु ॥ यच्छ्रेयस्तदस्तु ॥ यत्पापं -
तत्प्रतिहतमस्तु । पुण्याहं भवन्तो ब्रुवन्तु । स्वस्ति भवन्तो -
ब्रुवन्तु । ऋद्धिं भवन्तो ब्रुवन्तु । श्रीरस्त्विति भवन्तो ब्रुवन्तु ।
अमुक गोत्रो ऽमुक शर्माहं मम समस्त पितॄणां निरतिशय -
सानन्द ब्रह्मलोकावाप्त्यादि कन्यादान कल्पोक्त फलावाप्तये, 99
अनेन जनार्दनेन अस्यां तुलस्यां बीजोत्पादनेन ज्ञान
अवाप्तिद्वारा श्री परमेश्वर प्रीतये वरगोत्रमुच्चार्य -

वैयाघ्रपद गार्ग्य वासिष्ठेति त्रिप्रवरान्वित व्याघ्रपद
गोत्रोत्पन्नाय देवमीढ वर्मणः प्रपौत्राय शूरसेन वर्मणः
पौत्राय वसुदेव वर्मणः पुत्राय अनेक कोटि ब्रह्माण्ड -
नायकाय सकलप्रवर गोत्र जनकाय पार्वतीबीज संभूताय -
वृन्दा भस्माने संस्थिताय अनादि मध्य निधनाय परमात्मने -
श्रीधराय श्रीकृष्ण दामोदर वराय आलम्बायन देवल -
गौतमेति त्रिप्रवरान्वित विश्वकर्मणः प्रपौत्रीम् प्रजापतेः
पौत्रीम् ईश्वरस्य पुत्रीम् - अमुक गोत्रोत्पन्ना (यजमानस्य)
— शर्मणः पालित प्रपौत्रीम् अमुक शर्मणः पालित पौत्रीम्
पयोघटैः सेचित कन्यावत् वार्द्धित भावनीय तुलसी
नाम्नीं कन्याम् श्रीकृष्णार्थिनीम् श्री रूपिणीं वरार्थिनीम् -

Scanned by CamScanner

वनस्पति दैवत्यं -

- १ विष्णुसायुज्य प्राप्त्यर्थं तुभ्यमहं सम्प्रददे ॥ तुलसी पल्लवं
दक्षिण हस्तांगुष्ठेन परिकल्प्य दामोदर हस्ते दद्यात् ॥
(इति त्रिः) पुनः तुलसी तारयतु । पुण्यं वर्धताम् - -
- - - - वनस्पति दैवत्यं विष्णुसायुज्य प्राप्त्यर्थं तुभ्यमहं
संप्रददे । तुलसी प्रतिगृह्णातु भवान् ॥ ततो देवहस्तस्पर्शं तुलस्याः कृत्वा ॥
कइदं कस्मा अदात् - - - - - - - - पृथिवी प्रतिगृह्णातु ॥
इमां च तुलसीं कन्यां यथाशक्ति विभूषिताम् । व्याघ्रपद
गोत्राय श्रीकृष्ण दामोदर शर्मणे तुभ्यं दत्तां कृष्ण समाश्रय ॥
त्वं देवि मे ग्रतो भूयास्तुलसी देवि पार्श्वतः । देवि त्वम् १२
पृष्ठतो भूयास्त्वद्दानान्मोक्षमाप्नुयाम् ॥ चत्वारि मास पर्यन्तं
तुलस्याः पालनं कृतम् । तुभ्यं कृष्ण मया दत्ता मम मोक्षप्रदायिनी ॥
(अथवा - मयेयं रोपिता देवी वर्धिता तु त्रिमासिकम् । तुभ्यं

विष्णोऽधुना दत्ता आयुष्कीर्ति विवर्धिनी) धर्मेच मोक्षेच
नातिविलम्बनं कार्यम् ॥ दानस्य प्रतिष्ठा सिद्ध्यर्थं सौवर्ण-
मयीमिमां दक्षिणां तुभ्यमहं सम्प्रददे ॥ ततो विभवे सति -
गोदासी महिष्यादि भोजन जलपात्रादि दानम् ॥ उभयोः
अभिषेकः ॥ अनाधृष्टमस्यना॰ समुद्रज्येष्ठा॰ आनः प्रजां॰४
ततो दुग्धाक्तेन त्रिगुण शुक्ल सूत्रेण उभयोः कण्ठदेशे कटिदेशे
- - - - परित्वागिर्वणो गिर इमा॰ . . . अजुषध्वमध्वरम् ॥
तुलस्याः पल्लवे कृष्णहस्तेच बध्नीयात् ॥ यदाबध्नमिति मन्त्रेण॰॰
उभयोः तिलकं कृत्वा ॥ (अक्षतारोपणं कृताकृतम्) पुष्पमालां
वरकण्ठे निदध्यात् वरोऽपि कन्याकण्ठे ॥ ततो मंगलसूत्रादि॰ ॥
मांगल्य तंतुनानेन कृष्णजीवन हेतुना । कण्ठे बध्नामि - - - शतम् ॥
शच्यादि पूजनान्ते ब्राह्मणेभ्यो वायनादि दत्त्वा ॥

Scanned by CamScanner

ॐ भद्रं कर्णेभिः---॰। द्रविणोदा॰॰। सविता पश्चा॰। नवोनवो॰॥
उच्चादिवे॰॥ दक्षिणावतामिदं॰ इत्यायुःपदान्ताःषट्॥ तत-
आचार्यः स्थण्डिलमेत्य आचम्य। देशकालौ स्मृत्वा॥
प्रतिगृहीतायां तुलस्यां श्रीकृष्ण परमात्मना भार्यात्व सिद्ध्ये-
विवाहहोमं करिष्ये॥ इति संकल्प्य॥ स्थण्डिल करणादि अग्नि-
ध्यानान्ते ऽन्वादध्यात्॥ तुलसी विवाह होमे देवता परिग्रहार्थं
अन्वाधानं करिष्ये॥ -- अस्मिन्नित्यादि आघारावाज्येन-
इत्यन्तमुक्त्वा॥ अत्र प्रधानम् केशवादि चतुर्विंशति
नामभिरेकैकयाज्याहुत्वा, अग्निं पृथिवीं महान्तम्, वायुम्- १३
अन्तरिक्षं महान्तम्, आदित्यं दिवं महान्तम्, चन्द्रमसं-
नक्षत्राणि दिशो महान्तम् एताः प्रधानदेवताः प्रत्येकं

एकैकया हुत्या लाजद्रव्येण सर्वतो भद्रदेवताश्च एकैकयाहुत्या
आज्येन यक्ष्ये। शेषेण स्विष्टकृत-----॥ आघारान्तं कृत्वा॥
प्रधान होमं केशवादि चतुर्विंशति नामभिः कुर्यात्॥ तुलस्याः
पल्लवस्पर्शनं गृभ्णामिते इति मन्त्रेण कुर्यात्॥ ततो लाजा-
होमं कुर्यात्॥ ॐ भूरग्नयेच पृथिव्यैच महतेच स्वाहा॥
अग्नये पृथिव्यै महत इदं॰॥ ॐ भुवोवायवे चान्तरिक्षायच-
महते॰ वायवे अंतरिक्षाय महत॰॥ ॐ सुवरादित्यायच-
दिवेच महते॰॥ आदित्याय दिवे महत॰॥ ॐ भूर्भुवः सुवश्चन्द्र-
मसेच नक्षत्रेभ्यश्च दिग्भ्यश्च महते॰॥ चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो-
महत इदं॰॥ सर्वतो भद्र देवताश्च हुत्वा स्विष्टकृदादि होमशेषं
समापयेत्॥ आयुष्यमिति मन्त्रेण सौभाग्यालंकारादि दद्यात्॥

Scanned by CamScanner

ततो ऐरिणीदानम् ॥ पूर्वोच्चरितेत्यादि तुलसीदान सम्पूर्णफलार्थं श्रीपरमात्मानं वरं तद्युक्ताचार्यादीन् पूजयिष्ये॥ वस्त्राद्यैः - सम्पूज्य विवाहोक्त प्रकारेण ऐरिणीं सम्पाद्य ॥

तुलसीदानस्य सम्पूर्णता सिद्ध्यर्थं ऐरिणी पूजां आचार्य पत्न्यै - ऐरिणीदानं च करिष्ये ॥ ऐरिणीत्वमुमादेवी - - - दानानामुत्तमं दानमतः शान्तिं प्रयच्छमे ॥ याः फलिनीः अर्वाची॰ इतिमन्त्रैः दानम् ॥ दामोदर प्रतिमां तुलसी मध्ये रक्षेत् ॥ श्री महाविष्णवे तुलस्यै देव्यै च नमः बदरी धात्रीतिन्तिणी कपित्थफलानि - चणकपत्राणि इक्षुखण्डानि च समर्पयेत् ॥ १४

ततो महानीराजन दीपम् ॥ आर्तिक्यम् ॥ मन्त्रपुष्पम् ॥

ततः सपत्नीकः सकुटुंबः सपरिवारः यजमानः चतस्रः प्रदक्षिणाः कुर्यात् ॥ प्रार्थयेत् - चत्वारि मास पर्यन्तम् तुलस्याः पालनं कृतम् ।

इदानीं तु मया तुभ्यम् दत्ता स्नेहेन पाल्यताम् ॥

गृहप्रवेशः - ततः आचार्यश्च तुलसी सहितं दामोदरं शिबिकारूढं कृत्वा ॥ स्वगृहमानाय्य ॥ मंगलवाद्य पुरस्सरं जीवन्तिका पूजनपूर्वकं नृत्यगीतादि भोजनोत्सवं कुर्वीत ॥ सक्तुमिवेति मंत्रेण लक्ष्मीं सम्पूज्य ॥ गच्छगच्छ इत्यादिं विसृज्य ॥ इमां सोपस्करपीठयुतां आचार्याय सम्प्रददे ॥ इति दद्यात् ॥ आचार्याय शय्यां पदं गां च दद्यात् ॥ कर्मणः संगता सिद्ध्यर्थं ब्राह्मणान् क्षीर शर्कराज्यैर्यथाशक्ति भोजयेत् ॥ दीनानाथेभ्यो अन्नं दत्वा भूयसीं दक्षिणां दत्वा ॥ कर्मेश्वरार्पणं कुर्यात् ॥ इति स्मृति कौस्तुभे विष्णु पंचरात्रागमोक्त मूलवाक्यानुसारी तुलसीविवाह प्रयोगः ॥

॥ इति विष्णुप्रबोधोत्सव तुलसी विवाह प्रयोगः ॥

(संकलक लेखक - हरिहर रामचंद्र खण्डेश्वर - दिल्ली (दिनांक - १६-८-२०५)

## ॥ चातुर्मास्य नियम व्रत समाप्ति प्रकारः ॥

श्रीगणेशायनमः॥ कार्तिक शुक्ल द्वादश्यां प्रातः स्नात्वा,
नित्यकर्म विधाय॥ आचम्य देशकालौ स्मृत्वा॥ मया
कृतस्य [अमुक] चातुर्मास्य नियमव्रतस्य सांगता सिद्ध्यर्थं
तत्सम्पूर्ण फलप्राप्त्यर्थं ब्राह्मणाय वर्जितपदार्थ दानं
यथाशक्ति गोनिष्क्रय द्रव्यदानं च करिष्ये॥ इति संकल्प्य॥
कृतनियमानुसारेण तत्तदुद्यापनोक्त दानादिकं कृत्वा,
महाविष्णुं प्रार्थयेत्॥ इदं व्रतं मया देव कृतं प्रीत्यै तव प्रभो।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्दन॥ १५
तद्व्रतं ईश्वरार्पणं कुर्यात्॥

### - मंगलाष्टके -

१) गंगा गोमति गोपती गणपति गोविंद गोवर्धनौ। गीता गोमय गोरजो गिरिसुता-
गंगाधरो गौतमः॥ गायत्री गरुडो गया गिरिगुहा गम्भीर गोदावरी। गंधर्वग्रह-
गोपगोकुलगणाः कुर्वन्तु वो मंगलम् ॥१॥

२) वेदाश्चोपनिषद्गणाश्च विविधाः सांगाः पुराणान्विता। वेदान्ता अपि
मंत्रतंत्र सहितास्तर्क स्मृतीनां गणाः। काव्यालंकृति नीति नाटकगणाः शब्दाश्च-
नानाविधाः श्रीविष्णोर्गुणराशि कीर्तनपराः कुर्वन्तु वो मंगलम् ॥२॥

Scanned by CamScanner